# प्रतिस्पन्दः

(पञ्चदशः संस्कृतनाट्यमहोत्सवे प्रस्तुतानां रूपकाणां समीक्षाः)

## तृतीया परिस्फुरत्ता




राष्ट्रियसंस्कृतसंस्थानम्

(भारतशासन-मानवसंसाधनविकासमन्त्रालयाधीनः,

राष्ट्रियमूल्याङ्कन-प्रत्यायनपरिषदा 'ए'-श्रेण्या प्रत्यायितः मानितविश्वविद्यालयः)

नवदेहली

मुख्यपरामर्शकः
प्रो. परमेश्वरनारायणशास्त्री
कुलपतिः

प्रबन्धपरामर्शकः
प्रो. एस्. सुब्रह्मण्यशर्मा
कुलसचिवः

सम्पादकः
प्रो. रमाकान्तपाण्डेयः

सहसम्पादकः
डॉ. मधुकेश्वरभट्टः

## षोडशे संस्कृतनाट्यमहोत्सवे प्रदर्शनीयरूपकाणि

### ०८.०३.२०१९ ( शुक्रवासरः )

| | | |
|---|---|---|
| अनङ्गहर्षप्रणीतम्-तापसवत्सराजचरितम् | श्रीरणवीरपरिसरः, जम्मू | अपराह्णे २.३० तः ३.३० |
| मथुराप्रसाददीक्षितप्रणीतम्-भारतविजयम् | वेदव्यासपरिसरः, बलाहरः | अपराह्णे ४.०० तः ५.०० |
| महाकविभासप्रणीतम्-दरिद्रचारुदत्तम् | क.जे. सौमेयापरिसरः, मुम्बई | सायम् ५.३० तः ६.३० |

### ०९.०३.२०१९ ( शनिवासरः )

| | | |
|---|---|---|
| रामेश्वरदयालशर्मप्रणीतम्-शान्तामङ्गलम् | सदाशिवपरिसरः, पुरी | पूर्वाह्णे १०.०० तः ११.०० |
| महाकविदिङ्नागप्रणीता कुन्दमाला | लखनऊपरिसरः, लखनऊ | पूर्वाह्णे ११.३० तः १२.३० |
| श्रीहर्षप्रणीता-रत्नावली | श्रीरघुनाथकीर्तिपरिसरः, देवप्रयागः | अपराह्णे २.०० तः ३.०० |
| डॉ. रामाशीषपाण्डेयप्रणीतम्-शिखाबन्धनम् | एकलव्यपरिसरः, अगरतला | अपराह्णे ३.३० तः ४.३० |
| महाकविभासप्रणीतम्-अभिषेकनाटकम् | श्रीराजीवगान्धीपरिसरः, शृङ्गेरी | सायम् ५.०० तः ६.०० |

### १०.०३.२०१९ ( रविवासरः )

| | | |
|---|---|---|
| महाकविभासप्रणीतम्-मध्यमव्यायोगः | भोपालपरिसरः, भोपालम् | पूर्वाह्णे १०.०० तः ११.०० |
| भट्टनारायणप्रणीतम्-वेणीसंहारम् | जयपुरपरिसरः, जयपुरम् | पूर्वाह्णे ११.३० तः १२.३० |
| श्रीहर्षदेवप्रणीतम्-नागानन्दम् | गुरुवायूरपरिसरः, गुरुवायूर | अपराह्णे १.०० तः २.०० |



## नान्दी वाक्

'नाट्यं भिन्नरुचेर्जनस्य बहुधाप्येकं समाराधनम्' इति कालिदासोक्तिं हृदि निधाय राष्ट्रिय-संस्कृत-संस्थानेन न्यायव्याकरणमीमांसावेदान्तसाहित्यज्योतिषादिविविधप्रस्थानेषु प्राप्तशास्त्रप्रागल्भ्यानां स्वीयानाम् अनूचानानां विभिन्नक्षेत्रेषु प्रतिभाप्रसराय बहुभ्यो वर्षेभ्य: अन्त:परिसरीयनाट्यस्पर्धारूपेण कदाचित् कौमुदीमहोत्सवनाम्ना कदाचिद् वसन्तोत्सवनाम्ना सम्प्रति च नाट्योत्सवनाम्ना कार्यक्रमोऽयं समायोज्यते। कार्यक्रमोऽयं विश्वस्मिन्नपि विश्वे रङ्गविद्यायां भरत इव प्रतिष्ठितानां पणिक्करसदृशमहाविदुषां नान्दीवाक्संवलितमाशीराशिं समवाप्नोत्। अस्मत्कुशीलवा: शिष्या: भारङ्गमिति विश्वस्तरीयकार्यक्रमे स्वीययाऽभिनयनिपुणतया प्रशंसार्हं पदं प्राप्य पारम्परिकसंस्कृतनाट्य-मञ्चनैतिह्येऽभिनवं मानदण्डं स्थापितवन्त:। द्विशतं प्रायाणां संस्कृतनाटकानां मञ्चनं न केवलं भारते वर्षेऽपितु समग्रे भूमण्डले राष्ट्रियसंस्कृतसंस्थानेनैव कारितमिति संस्मृत्य हर्षप्रकर्षं परिचुम्बति संस्कृतसमुपासकानामस्माकं मन:।

पूर्वं नाट्यमहोत्सवोऽयं देहल्याम् अगरतलानगरे च अन्यसंस्थानां रङ्गमञ्चेषु समायोजितोऽभवत्। भारतसर्वकारस्य कलाप्रेम्ण: विद्यानुरागस्य चेदं फलं यद् ऐषम: संस्थानस्य नाट्यशास्त्रस्य प्रायोगिकभूमौ भगवतो गुरुपवनपुरेशस्य चरणकमलकिञ्जल्कभूते नाट्यविद्यायामतिनिपुणे पुरनाट्टुकरास्थानके संस्थिते परिसरे रङ्गमण्डपं सिद्धमस्तीति षोडशोऽयं नाट्यमहोत्सव: तदुद्घाटन-महोत्सवरूपेण समायोज्यत इति मया सर्वेऽपि कुशीलवा: शिष्या विद्वांस: प्राध्यापका आचार्या अन्ये च यज्ञस्याऽस्य साक्षिभूता भारतभुवो विभिन्नेभ्यो मण्डलेभ्य: समागता नाट्यविद्याविशारदा आचार्याश्च वर्धापनततिभि: संयोज्यन्ते। भारतसर्वकारेण प्रदत्तधनराशिना कार्यक्रमोऽयं प्रचलति इति संस्कृतपरिवारपक्षतोऽहं भारतसर्वकाराय आधमर्ण्यं वहामि।

**( प्रो. पी.एन. शास्त्री )**
कुलपति:

---

## शुभाशंसनम्



दृश्यं श्रव्यं चेति काव्यं प्रमुखतया द्वैविध्यं भजते। समस्तकाव्यभेदेषु रूपकं सर्वतोरम्यमिति न कापि संशीति:। प्रयोगप्रधानं हि नाट्यमिति कालिदासवचोनुगुणं रूपकं मञ्चे प्रयुज्यमानमेव स्वीयां पूर्णतामेति। रूपकाणां प्रयोगप्रकृतिवशात् सहजमेव तत्र बहुविध-कला-विद्या-शास्त्र-शिल्पादीनां समावेशो भवति। तद्यथाह नाट्यशास्त्रकारो मुनिर्भरत: -

**न तज्ज्ञानं न तच्छिल्पं न सा विद्या न सा कला।**
**नासौ योगो न तत्कर्म नाट्येऽस्मिन् यन्न दृश्यते॥**

देशस्य विविधभागेषु अवस्थिता: राष्ट्रियसंस्कृतसंस्थानस्य त्रयोदश: परिसरा: संस्कृतविद्याया: कमपि विशेषं सदैव प्रकटीकुर्वन्ति। एतेषु परिसरेषु अधीयाना: उपपञ्चसहस्रं छात्रा: संस्कृतनाटकानां प्रयोगपरम्परामवगच्छन्तु रङ्गमञ्चे च निजप्रतिभाया आविष्काराय विकासाय च अवसरं लभन्तामिति धिया राष्ट्रियसंस्कृतसंस्थानेन अन्त:परिसरीय: संस्कृतनाट्यमहोत्सव: प्रतिवर्षं समायोज्यते। प्रतिज्ञायौगन्धरायणं बालभारतं प्रबुद्धरौहिणेयं तथा चान्यानि रूपकाणि इदम्प्रथमतया महोत्सवेऽस्मिन् प्रस्तुतानि। एतासु प्रस्तुतिषु भासहर्षकालिदासादीनां, नैकेषामज्ञातप्रायाणां च दुर्लभप्राचीनाधुनिकनाटकानामाविष्कारोऽपि कृतोऽस्ति। ऐषम: अन्त:परिसरीयस्पर्धात्मक: षोडश: संस्कृतनाट्यमहोत्सव: केरलराज्ये गुरुपवनेशपुरे विद्यमाने गुरुवायूरपरिसरे समायोजयिष्यते। गते संवत्सरे नाट्यमहोत्सवे छात्राणामभिनयकौशलवर्धनाय परिष्काराय च माननीयकुलपतिभि: आरचिता नाट्विदां समिति: प्रतिरूपकं सूक्ष्मैक्षिकया परिशील्य स्वाभिप्रायं प्राकटयत्। अभिप्रायाणां संग्रह: एव 'प्रतिस्पन्द:' इति नाम्ना पुस्तिकारूपेण प्रकाश्यते। अयं प्रतिस्पन्द: छात्राणां परिष्कारशेमुषीं संवर्धयेत् इति आशासे। अहं प्रसन्नमनसा षोडशे नाट्यमहोत्सवे भागं गृहीतुं समागतान् कुशीलवान् शुभकामनाभि: सम्भावयामि।

**( प्रो. एस्. सुब्रह्मण्यशर्मा )**
कुलसचिव:



# सम्पादकीयम्

'नाट्यं

( रमाकान्तपाण्डेयः )

सम्पादकः

# पञ्चदशनाट्यमहोत्सवस्य उद्घाटनसमारोहे मुख्यातिथीनां कविप्रवराणां प्रो. अभिराजराजेन्द्रमिश्रवर्याणाम् अभिभाषणम्



मान्याः सभाध्यक्षमहोदयाः, वीरविक्रमविश्वविद्यालयस्य कुलपतिमहोदयाः, अधिमञ्चं विरजामानाः मामकीनाः देववाणीकुटुम्बस्य चिरपरिचिताः मित्रवर्याः, भगिन्यः, प्रियाः छात्राः, अहं तावत् अस्मिन् मण्डपे निखिलं भारतं पश्यामि, इदमेव भारतं कदाचित् आसीत्। एतादृशा भारतेनैव भाव्यम्। एतादृशी कल्पना अस्माकं वर्तते। अस्मिन् भारते न किमपि प्रथमं राज्यं भवेत्, न कापि पृथक् भाषा भवेत्, न पृथक् व्यक्तित्वं भवेत्। एतादृशमेव भारतम् अत्र उपस्थितं वर्तते। भवतां समेषाम् एकमेव सारस्वतं राज्यं, एका एव जातिः, एकमेव प्रत्यभिज्ञानम्, एका एव भाषा, एकमेव स्वरूपम्, अत्र वर्तते। एतत्सर्वं संस्कृतमहिम्नैव वर्तते। संस्कृतभाषयाः कारणेनैव एतत्सर्वं संभाव्यते। बन्धवः, वयं सर्वे अतीव भाग्यशालिनः। पञ्चदशः महोत्सवः नाटकानाम् अत्र संपूर्यते, त्रिभिः दिनैः। सौभाग्यवशात् राष्ट्रियसंस्कृतसंस्थानस्य ये केऽपि पूर्वतनकुलपतयः कर्णधारा आसन्, तेषां समेषां प्रीतिवशात् अहं सर्वेषु नाट्यमहोत्सवेषु साक्षिरूपेण विद्यमान आसम्। यावत्यः प्रस्तुतयः अद्यावधि संजाताः प्रायेण सर्वासु प्रस्तुतिषु ममापि उपस्थितिः तत्र आसीत्। अत एव विगतकालेऽपि यानि नाटकानि अत्र प्रस्तुतानि आसन्, तेषां सर्वेषां द्रष्टाऽहम् आसम्। अतः ममानुभूतीनां कापि बृंहीयसी परम्परा मम स्मृतिपथे वर्तते। अहं तावत् अनुभवामि कीदृशनाटकानि अतीतकाले मञ्चितानि, काः काः समस्याः समुद्गताः केन प्रकारेण चिन्तनं जातम्, एकस्मिन् वर्षे केवलं प्रहसनानाम् अपरस्मिन् वर्षे केवलं नाटिकानां, मञ्चनं भवेत् इति अनेन प्रकोरण यानि यानि चिन्तनानि जातानि तेषु तेषु चिन्तनेषु साक्षिरूपेण ममोपस्थितिः आसीत्। अत एव मादृशस्य जनस्य महतः स्वाभिमानस्य विषयः यत् नाट्यमहोत्सवे सदस्यरूपेण सदैव संम्पृक्त आसम्। इदनीमपि सर्वेषां मित्रवर्याणाम् अनुकम्पया अत्र विद्यमानोऽस्मि। बन्धवः, नाट्यं तावत् साहित्यस्य प्रधानतमं खण्डं वर्तते। यतोहि नाटकमेव अनुहरति निखिलमेव ब्रह्माण्डम्। इदं निखिलमेव जगत् नाट्यस्वरूपं विद्यते। यथा मञ्चे रामादीनां प्रत्नानां पात्राणाम् अनुकरणं कुर्मः, तेनैव प्रकारेण स्वकीयजीवने सर्वेऽपि जनाः पुरातनजनानाम् अनुकरणं कुर्वन्ति। केचिज्जनाः दुष्टानाम् अनुकरणं, केचिज्जनाः साधूनाम् अनुकरणं च कुर्वन्ति, केचिज्जनाः षड्यन्त्रपरायणानाम्। प्राचीनकाले यानि पात्राणि आसन्, तेषां सर्वेषां पात्राणाम् अनुकरणं कुर्वन्तः जनाः दृश्यन्ते। अत एव समाजेऽपि निरन्तरं नाट्यं प्रचलति। तत्रापि विवाहरूपेण नान्दी समायाति एवं नाट्योचितानि घटनानि समायान्ति। अतः एव सकलोऽपि समाजः नाट्यस्वरूपेण प्रतीयते। त्रिवर्गसाधनं नाटकमिति उदीरितं मनीषिभिः। चतुर्षु पुरुषार्थेषु मुक्तिं विहाय त्रयाणां पुरुषार्थानां सिद्धिः नाटकेनैव जायते। यदा त्रयाणां सिद्धिः जायते, तदा चतुर्थस्य सिद्धिः सहजतया जायते। त्रिवर्गसाधनं नाट्यमिति उपचारमात्रम्। नाट्यं नापि सरला प्रक्रिया विद्यते। किन्तु प्रत्नानां पात्राणाम् अनुकरणमेव नाट्यं विद्यते। परन्तु इदम् अनुकरणं नापि सरलम्, अतीव कठिनम्। यतोहि अनुकरणम् अङ्गेन क्रियते, वचनेन क्रियते, वेषभूषया क्रियते, सत्त्वेन च क्रियते। यदि कश्चन नायकस्य अनुकरणं कुर्यात्, तस्य वचनं वेषभूषा च नायकोचिता भवेत्। सिद्धान्तरूपेणापि नाटकमतीव कठिनम्। सर्वाणि पात्राणि सर्वेऽपि जनाः मञ्चमागत्य स्वाभाविकं रूपं परित्यज्य, तदनन्तरमेव दुष्यन्तीभूय, शकुन्तलीभूय, भूमिकां निर्वहन्ति। एतादृशी कठिना प्रक्रिया नाटकस्य भवति। अत एव नाटकमेका तपस्या विद्यते। सा तपस्या अस्माकं सुकुमारैः छात्रैः कथं समाचर्यते इति वयं पश्यामः। अयं नाट्यमहोत्सवः सर्वेषां रुचिवर्धनाय समर्थो भविष्यति, एतादृशनाट्यमहोत्सवेनैव देवभाषा जीवतीति विश्वसिमि। पुनरेकवारं सर्वेभ्यः धन्यवादं वितीर्य विरमामि।



❖❖❖

# संपन्नस्य पञ्चदशस्य अन्तःपरिसरीयनाट्यमहोत्सवस्य प्रतिवेदनम्



राष्ट्रियसंस्कृतसंस्थानेन प्रतिवर्षम् अन्तःपरिसरीयनाट्यमहोत्सवः समायोज्यते। ऐषमः पञ्चदशः अन्तःपरिसरीयनाट्यमहोत्सवः 21.11.2017 दिनाङ्कात् 24.11.2017 दिनाङ्कं यावत् राष्ट्रियसंस्कृतसंस्थानस्य अगरतलास्थे एकलव्यपरिसरे भव्यतया समपादि। राष्ट्रियसंस्कृतसंस्थानस्य देशस्य विविधप्रान्तेषु राजमानानां परिसराणां छात्रैः मनोहराणि संस्कृतनाटकानि अभ्यनीयन्त। अस्य संस्कृतनाट्य-महोत्सवस्य उद्घाटनकार्यक्रमः 21.11.2017 दिनाङ्के संपन्नः। उद्घाटन-कार्यक्रमेऽस्मिन् मुख्यातिथित्वेन प्रसिद्धकविः संपूर्णानन्दसंस्कृतविश्वविद्यालयस्य कुलपतिचरः आचार्यः अभिराजराजेन्द्रमिश्रवर्यः, अध्यक्षत्वेन राष्ट्रियसंस्कृत-संस्थानस्य कुलपतिः प्रो. परमेश्वरनारायणशास्त्रिमहोदयः च उपस्थितः अभूत्। प्रास्ताविकं विदधानः नाट्यहोत्सवस्य संयोजकः प्रो. रमाकान्त पाण्डेयमहोदयः अवोचत् यत् राष्ट्रियसंस्कृतसंस्थानेन प्राचीनानि नवीनानि नाटकानि मञ्चितानि-अयम् उद्यमः केनापि विश्वविद्यालयेन न कृतः ऐदम्प्राथम्येन राष्ट्रियसंस्कृत-संस्थानेन विहितः इति। संपूर्णानन्दसंस्कृतविश्वविद्यालयस्य कुलपतिचरः आचार्यः अभिराजराजेन्द्रमिश्रवर्यः संस्कृतरूपकाणि मानवेभ्यः सन्मार्गं दिशन्ति जीवनस्य लक्ष्यं च प्रदर्शयन्ति एवं संस्कृतभाषासामर्थ्यजननमपि नाटकस्य मुख्यं प्रयोजनं विद्यते। युवानः छात्राः नूतननाटकानां प्रयोगद्वारा अनुभवे नावीन्यं सम्पादयेयुः। रूपकाणां दर्शनेन अभिनयेन च संस्कृतभाषायाः उच्चारणशुद्धता भविष्यति। आधुनिकरूपकाणां प्रस्तुतेः इदं लक्ष्यं विद्यते यत् आधुनिकसमाजस्य परिस्थितिं जानीयुः आस्माकीनाः इति राष्ट्रियसंस्कृतसंस्थानस्य कुलपतिः प्रो. परमेश्वरनारायणशास्त्रिमहोदयः अबूबुधत्।

ततः परं भोपालपरिसरीयच्छात्रैः पूर्वरङ्गं प्रस्तुतम्। पूर्वरङ्गे प्रस्तोष्यमाणनाटकानां विषयवस्तु न्यरूपि। वेदव्यासपरिसरस्य छात्रैः उदात्तराघवम्, श्रीरणवीरपरिसरस्य छात्रैः चैतन्यचन्द्रोदयम्, राजीवगान्धीपरिसरस्य छात्रैः सुभद्राधनञ्जयम्, एकलव्यपरिसरस्य छात्रैः राघवाभ्युदयम्, श्रीरघुनाथकीर्तिपरिसरस्य छात्रैः लक्ष्मीमानवेदम्, श्रीसदाशिव-परिसरस्य छात्रैः बाणहरणम्, लखनऊपरिसरस्य छात्रैः विख्यातविजयम्, गुरुवायूरपरिसरस्य छात्रैः सीताराघवम्, जयपुरपरिसरस्य छात्रैः किरातार्जुनीय-व्यायोगः, क.जे. सोमैयासंस्कृतविद्यापीठस्य छात्रैः विवेकानन्दविजयम्, भोपाल-परिसरस्य छात्रैः प्रेमपीयूषम् इति रूपकाणि अभ्यनीयन्त।



नाट्यमहोत्सवस्य समापनकार्यक्रमः 24.11.2017 दिनाङ्के संपन्नः। संपूर्तिसमारोहे मुख्यातिथिपदं गुजरातस्थअम्बेडकरविश्वविद्यालयस्य कुलपतिः प्रो. पङ्कजजानिमहाभागः, अध्यक्षपदं राष्ट्रियसंस्कृतसंस्थानस्य कुलपतिः प्रो. परमेश्वरनारायणशास्त्रिवर्यः च अलमकार्षीत्। राष्ट्रियसंस्कृतसंस्थानेन अद्यावधि पञ्चाशतधिकैकशतं रूपकाणां प्रस्तुतिः विहिता इति अयं श्लाघनीयो विषयो विद्यते। अभिनीतनाटकेन आनन्दः संदेशश्च लब्ध इति प्रो. पङ्कजजानिमहाभागः अभिप्रैत्। अभिनयः अपि सरस्वत्याः आराधनं विद्यते। नाटकस्य दर्शनेन प्राप्तस्य नूतनानुभवेन अस्माकं दोषाणां परिमार्जनं कर्तुं शक्नुमः। इदंप्रथमतया संस्थानेन अयं नाट्यमहोत्सवः पूर्वोत्तरराज्योषु आयोजितो विद्यते। आयोजनस्य मुख्यं लक्ष्यं संस्कृतस्य प्रचारः प्रसारः च इति राष्ट्रियसंस्कृतसंस्थानस्य कुलपतिः प्रो. परमेश्वरनारायणशास्त्रिवर्यः अवादीत्। राजीवगान्धीपरिसरस्य छात्रैः अभिनीतं सुभद्राधनञ्जयम् इति रूपकं प्रथमस्थानं, गुरुवायूरपरिसरस्य छात्रैः अभिनीतं सीताराघवम् इति रूपकं द्वितीयस्थानं, क.जे. सोमैयासंस्कृतविद्यापीठस्य छात्रैः अभिनीतं विवेकानन्दविजयम् इति रूपकं तृतीयस्थानं सान्त्वनापुरस्कारं एकलव्यपरिसरस्य छात्रैः अभिनीतं राघवाभ्युदयं च अवाप्नोत्।

# संस्कृत-नाट्यमहोत्सवस्य स्थलान्तरितः सोपानः

**श्रीधरभास्करवर्णेकरः**

प्रतिवर्षानुसारम् ऐषमः अन्तःपरिसरीयः स्पर्धात्मकः पञ्चदशः संस्कृत-नाट्यमहोत्सवः राष्ट्रिय-संस्कृत-संस्थानेन त्रिपुराराज्यस्य राजधान्याम् अगरतलानगरे, रवीन्द्र-शतवार्षिकभवने, मार्गशीर्षशुक्लचतुर्थीतः षष्ठीं यावत् (तदनुसारं नवम्बरमासस्य 22-24 दिनाङ्केषु) समायोजितः। इतः पूर्वं विगत-चतुर्दश-नाट्यमहोत्सवाः नवदेहल्यामेव अभवन्, स्थानान्तरस्यैषः प्रथमः प्रयासः समुचितोऽभवदिति मे अभिप्रायः। आहत्य सार्धशतानां संस्कृतनाट्यपुष्पाणां मालिकां नटेश्वराय समर्प्य प्रस्तुतीकरणस्य यः अभूतपूर्वः विक्रमः संस्थानेन संस्थापितो वर्तते, तस्यैवायमग्रिमः सोपानः। मानव-संसाधन-विकास-मन्त्रालयाधीनेन अनेन मानितविश्वविद्यालयेन कलास्वादं निमित्तीकृत्य युवच्छात्राणां कायिकः, मानसिकः, वाचिकः कौशलविकासः घण्टात्मकैः प्रयोग-प्रधान-नाटकैः संसाधयितुं यथेष्टं स्पृहणीयः प्रयासः विहितः इति वक्तुं शक्यते।

एवमेतत्सप्रयोजनं साधयतः नाट्यमहोत्सवस्यास्य उद्घाटनसत्रं बुधवासरे 22 नवम्बरदिनाङ्के प्रातः सार्धदशवादनावसरे सोत्साहं समन्त्रघोषं समारब्धम्। भरतनाट्यशास्त्रमधिकृत्य डॉ. अभिराजराजेन्द्रमिश्रवर्यः पाण्डित्यपूर्णमस्खलितं सुसंस्कृतं बीजभाषणमकरोत्। संयोजकः आचार्यः रमाकान्तपाण्डेयः, त्रिपुरा-विश्व-विद्यालयस्य कुलगुरुः डॉ. वसुः संस्थानकुलपतिः डॉ. परमेश्वरनारायणशास्त्री इत्यादयः समयोचितं मार्गदर्शनं कृतवन्तश्च। ततः सर्वेषां स्पर्धानाटकानाम् उत्तमांशः पूर्वरङ्गरूपेण भोपालपरिसरस्य नाट्यानुसन्धानकेन्द्रेण सम्यक् प्रस्तुतः यस्मिन् वाद्यसङ्गीतं विशेषपरिणामकारकमासीत्।

भोजनोत्तरे प्रदीर्घे प्रथमे नाट्यसत्रे आदौ लखनऊ-परिसरचमूः महाभारतस्य कर्णार्जुनयोः द्वैरथयुद्धे श्रीकृष्णस्य मार्गदर्शने धनञ्जयस्य विख्यातविजयं सुष्ठु प्रस्तुतवती। नान्दीप्रसङ्गे नटयोगिनः धनुरासनं संसूचकमासीत्। पात्राणां वेषभूषा, युद्धे च रथारोहणस्य मञ्चनं प्रेक्षकेभ्यः अरोचत। परं पार्श्वे युद्धदुर्मदानां कोलाहले नाट्यप्राणः मुख्यपात्रसंवादः अस्पष्टोऽभवत्। तदविगणय्य आहत्य प्रस्तुतिः भरतवाक्यं च समुचितमभिनीतमासीत्।

मुम्बईमहानगरात् समागता सोमैयासंस्कृतविद्यापीठस्य नाट्यचमूः प्रज्ञाभारतीति विश्रुतैः डॉ. भास्करवर्णेकरवर्यैः विरचितं विवेकानन्दविजयमिति महानाटकस्य प्रमुखांशं प्रस्तुतवती। नूनं जन्मशताब्दपर्वणि साहित्यकारस्य वाङ्मयीं मूर्तिमेव कलाकाराः रङ्गमञ्चे साकारितवन्तः। तदा किल स्वपितृणां कृतिमिमामवलोक्य निम्नलिखितं स्फुटश्लोकम् अयं जनः तत्रैव व्यरचयत्।

**त्रिपुरविजयतीर्थे भव्यनाट्योत्सवे यत्**
**समुचितमभिनीतं मुम्बई-छात्र-चम्वा।**
**जयति जगति यस्मिन् स्वामिवर्यो विवेकः**
**स्मरतु जयतु नाट्यं वाङ्मयं तातरूपम्॥**






















तृतीये क्रमे केरलप्रान्तीयस्य संस्कृत-साहित्यकारस्य श्रीरामपाणिवादस्य 'सीताराघवम्' इति सङ्गीतनाटकं गुरुवायूरपरिसरात् समागतैः छात्रैः कथकलीनाट्यकलामाश्रित्य दाक्षिणात्यवेषभूषाभिनयैः बहूत्तमरीत्या प्रस्तुतम्। नाट्यारम्भं कुर्वत्यः चलन्त्यः पात्रमूर्तयः, रावणस्य वेषपरिवर्तनं, दशाननदर्शनं, आकाशयानेन सीताहरणं, तस्य च अशोकवने सीतानुनयप्रसङ्गः, देवासुरपात्राणां शब्दोच्चारणभिन्नता इत्यादिलक्षणानि सम्यक् प्रस्तुतानि अभवन्। परशुरामस्य क्रोधः, वालिवधप्रसङ्गः, रामरावणयोश्च युद्धं पार्श्वनादैः सह पात्रैः सुष्ठु अभिनीतमभवन्। नाट्यान्ते पुष्पकविमाने प्रत्यागमनं, शान्तिमन्त्रेण सह ससङ्गीतं भरतवाक्यम् इत्यादिकं सर्वमनोहारि आसीत्। सम्प्रति सुविकसिते नवविज्ञानतन्त्रे दृश्य-श्रव्यमाध्यमानि उपयुज्य मञ्चशिल्पमाश्रित्य च नाट्यमञ्चने आहार्याभिनयपक्षः नितराम् अभिवर्धितः। परमस्यां नाट्यकृत्याम् उभयोः वाचिकाहार्ययोः सुसङ्गमः सर्वैः पात्रैः अभिनीतः। नूनं प्रयासोऽयं पारितोषिकार्हः भवति।

हिमाचलप्रदेशस्थेन बलाहरपरिसरच्छात्रैः मायुरराजप्रणीतम् 'उदात्तराघवम्' इति चतुर्थं नाटकं प्रस्तुतमासीत्। प्रारम्भे नाट्यानन्तरं रामराज्याभिषेकस्य सिद्धतां कुर्वती माताकौशल्या वनवासविषये श्रुत्वा कारुण्यं तनुते। भगिन्याः शूर्पणखायाः अपमानेनापविद्धः रावणः छद्माचार्यवेषेण पञ्चवटीमागत्य सीतां हरति। तामन्वेष्टुं यतमानः, रामवचनबद्धः सुग्रीवः हतोत्साहो भूत्वा यदा आत्मदहनाय सिद्धः वर्तते तदैव लङ्कातः प्रत्यागतः हनूमान् सीतायाः आभूषणं प्रदर्शयन् प्रविशति। ततश्च रामरावणयोर्युद्धं, विभीषणस्य राज्याभिषेकः, पुष्पकविमानेन प्रत्यागमनात् पूर्वं नारदवेषधारिणा राक्षसस्य षड्यन्त्रे पतितस्य भरतस्य वसिष्ठाश्रमोपान्ते हनूमता कृतेन समाधानेन सुखान्ते सम्पन्नतामेति। नूनं पारम्परिकां रामलीलामिव अभिनीतं सामान्यं नाटकमिदम्। अस्पष्टः अश्रूयमाणः संवादः, क्षीणः आहार्याभिनयपक्षः, वेषभूषा इत्येतादृशाः दोषाः नाटकमिदम् अरोचकं व्यदधात्। अस्मिन् उदात्तराघवमिति नाटके हनुमतः भूमिका एव महत्त्वं भजते स्म। सुविदितमिदं यत् आदिकविवाल्मीकि-विरचितस्य रामायणकथायाः अथ च व्यासगुरुणा उदीरितस्य जयेतिहासस्य स्वप्रतिभया विस्तारं विधाय विविधानि संस्कृतनाटकानि विद्वद्वर्यैः विरचितानि सन्तीति। अस्मिन् नाट्यमहोत्सवे अपि रामकथामाश्रित्य प्रस्तुतानि चत्वारि अथ च भारताधिष्ठितानि त्रीणि नाटकानि भिन्नं भिन्नं वैशिष्ट्यपूर्णं परिवर्तनं प्रदर्शयन्ति।

नाट्यमहोत्सवस्यास्य प्रदीर्घे प्रथमसत्रान्ते जम्मू-काश्मीरप्रदेशात् समागतया रणवीर-परिसरस्य छात्रचम्वा कविकर्णपूरेण षोडशशताब्द्यां विरचितं गौराङ्गमहाप्रभोः भक्तिमयं जीवनविषयकं 'चैतन्यचन्द्रोदयम्' इति नाटकं प्रस्तुतमासीत्। तराणागान-प्रकारेण प्रारम्भः, भक्तिः कारुण्यं, व्याकुलतासदृशानां भावानां प्रतीकात्मकं प्रस्तुतिः, कायिकवाचिकाहार्यसात्त्विकाभिनयचतुष्टयस्य संमिश्रणमित्यादीनि वैशिष्ट्यानि सुष्ठु प्रदर्शितान्यभवन्।

तृतीये अन्तिमे दिने नाट्यसत्रारम्भः प्रातः सार्धाष्टवादनावसरे एव सञ्जातः। भोजनावकाशं यावत् चतुर्णां नाटकानां मञ्चनमभवत्। उत्तराखण्डस्य देवप्रयागक्षेत्रात् समागतेन रघुनाथकीर्तिपरिसरचम्वा प्रारम्भे कविदिवाकरविरचितशृङ्गाररसप्रधानं

"लक्ष्मीमानवेदम्" इत्याख्यमभिनवरूपकं सम्यक् प्रस्तुतम्। नाट्यारम्भे पूर्वरङ्गरूपेण सर्वेषां पात्राणां मञ्चनं, समूहगीतं, भार्गवाश्रमपरिसरे पक्षिकूजनध्वनिः, मानवेद-राजलक्ष्म्योः अनुरागमयं मेलनं, परस्परचित्रालेखनं, मदनबाधा, चित्ररथाकृतव्रणयोः चर्चा, वनदेवतायतने पाणिग्रहणं, राज्याभिषेकः इत्यादयः प्रसङ्गाः सुष्ठु प्रदर्शिताः आसन्। भरतवाक्यम् अपि अत्युत्तममभवत्। ततः वैकुण्ठविहारिशर्मप्रणीतं "बाणहरणम्" इति महाभारतकथामाश्रित्य भ्रातृवादस्य दुष्परिणामं प्रदर्शयत् नृत्यप्रधानं नाटकं श्री सदाशिवपरिसरात् उत्कलप्रान्तात् समागता छात्रचमूः बहूत्तमरीत्या प्रस्तुतवती। प्रारम्भे अभूतपूर्वं पात्रस्वागतं, नटीविदूषकयोः सुसंवादः, क्रमेण च गदायुद्धं, शकुनिप्रवेशः, भीष्माचार्यस्य अत्युत्कृष्टः वाचिकाभिनयः, कृष्णपाण्डवानां वार्तालापः, मुकुटप्रदानं भरतवाक्यं च सर्वं सर्वैः पात्रैः सुन्दरतरमभिनीतम्। प्रत्येकं भाषणं सुयोग्यतया कण्ठस्थीकृतं, समुच्चारितं, कायिक- वाचिकाहार्याभिनयैः सुसम्पन्नमभवत्। नूनं पारितोषिकार्हा प्रस्तुतिरियम्।

अन्तिमं नाटकं यन्मया अवलोकितं तदभवत् शृङ्गेरीस्थेन श्रीराजीवगान्धीपरिसरच्छात्रैः सम्यगभिनीतं कुलशेखरवर्मणा प्रणीतं सुभद्रा-धनञ्जयमिति। ससङ्गीतेन शेषशायिभगवद्दर्शनेन नाट्यारम्भः कर्णनेत्रेभ्यः सुखदोऽभवत्, तथैव दाक्षिणात्यवेषभूषाभिनयैः संसाधितं सखिभिः सह श्रीकृष्णस्य नृत्यम्, अर्जुनस्य धीरगम्भीरः वाचिकाभिनयः, पट्टचक्रैः प्रदर्शितः युद्धप्रसङ्गः, मन्दिरे नृत्यगीतं, सुभद्राऽर्जुनयोः मेलनं, दाण्डिया-यक्षगानयोः मिश्रणम्, आकाशमार्गेण सयुद्धं प्रयाणं, रथनृत्याभिनयः, भरतवाक्यम् इत्यादिकं सर्वं मनोहारि आसीत्।

संक्षेपेण यानि अष्टौ नाटकानि मया अवलोकितानि तेषु घण्टात्मकेन अभिनयकौशलेन स्पर्धात्मकः प्रयासः सर्वैः कलाकारैः यथेष्टं प्रदर्शितः। ते सर्वे अभिनन्दनार्हाः भवन्ति। स्पर्धायां जयपराजयौ भवत एव। तथापि पराजयः नवप्रयासाय, अथ च जयः विनयाय प्रेरकौ स्यातामित्येव अपेक्ष्ये। इस अभियान में कौमुदीमहोत्सव के आयोजन की एक केंद्रीय भूमिका हो सकती है। इस महोत्सव के मंच से 150 संस्कृत नाटकों की प्रस्तुति हो चुकी है, जो एक उपलब्धि है। इसमें की गई अनेक प्रस्तुतियाँ अखिल भारतीय रंगमंच पर होने वाले उत्तमोत्तम प्रयोगों के समतुल्य रही हैं। ऐसी प्रस्तुतियों को अन्यत्र भी मंच प्राप्त हों, ऐसा प्रयास किया जाना चाहिये। साथ ही, इसमें होने वाली प्रविष्टियाँ और अधिक साधनसम्पत्ति व कलादक्षता के साथ प्रस्तुत हों तथा नाट्यशास्त्र के सिद्धांत व प्रयोग उभयविध पक्षों के मर्मज्ञ रंगकर्मियों के द्वारा उन्हें संस्कारित किया जाता रहे। संस्कृत नाट्यपरंपरा की विविधता तथा समृद्धि भी इसके द्वारा रेखांकित हो। आज यह संभावना बनी है कि यह महोत्सव भारतीय रंगमंच की एक महत्त्वपूर्ण घटना के रूप में ऐतिहासिक महत्त्व प्राप्त करे। संस्थान के प्रशासन, अध्यापकों की अभिरुचि व छात्रों की दक्षता से यह संभावना साकार हो सकती है।

❖❖❖
























# पन्द्रहवाँ संस्कृत नाट्यमहोत्सव

**-प्रो. अभिराजराजेन्द्रमिश्र**

**राष्ट्रियसंस्कृतसंस्थान** (मानितविश्वविद्यालय) नई दिल्ली द्वारा प्रवर्तित कौमुदी-महोत्सव संस्कृत के रंगमञ्च की पुन: प्रतिष्ठापना का एक विलक्षण उपक्रम है। इस उपक्रम से न केवल, संस्कृत के भूले-बिसरे कालजयी नाटक पुन: जन समूह के कण्ठहार बने हैं, प्रत्युत उनकी लोकप्रियता भी बढ़ी है संस्कृत न जानने वाले दर्शकों को भी इन नाट्यकृतियों ने बरबस आकृष्ट किया है। इन मञ्चप्रयोगों से संस्कृत के प्रति लोक का आकर्षण द्विगुणीभूत हुआ है। अभिभावकों के मन में अपने बच्चों को संस्कृत पढ़ाने की लालसा जन्मी है तथा संस्कृत के प्रति अन्यमनस्क राजनेताओं के मन में भी (जो इन नाटकों के दर्शक रहे हैं) नया कर्तव्यभाव पैदा हुआ है। एक राजनेता ने तो विस्मयविमुग्ध भाव से यह भी कहा कि यह **समारोह केवल आपके कौमुदी-महोत्सव में वर्ष में एक बार ही नहीं होना चाहिए। इसे तो चण्डीगढ़, जयपुर, जोधपुर तथा बँगलोर जैसे सभी महानगरों में आयोजित होना चाहिए।**

राजनेता की यह टिप्पणी कोई सामयिक प्रशस्ति मात्र नहीं है, प्रत्युत एक प्रासंगिक एवं युगोचित अनुरोध है दूरदर्शन के अनेक मर्यादाहीन प्रसारणों तथा धारावाहिकों ने तो रंगमञ्च एवं दृश्यकाव्य का अर्थ ही बदल दिया है। उस दूषित वातावरण का अपनोदन संस्कृत के शिष्ट नाटकों से ही संभव है। इस दिशा में किया जा रहा **संस्कृत संस्थान** का यह आन्दोलनात्मक प्रयास सर्वथा स्तुत्य है।

अगरतला में आयोजित नाट्यसमारोह अनेक दृष्टियों से प्रशंसनीय रहा। मेरा सौभाग्य था इस समारोह को आद्यन्त देखने का। पूर्वरंग से प्रारभ्य इस अनुष्ठान की पहली कड़ी थी **विख्यातविजयम्** नाटक तथा अन्तिम कड़ी थी प्रो. राधावल्लभत्रिपाठी-प्रणीत **प्रेमपीयूषम्** नाटक, जो महाकवि भवभूति के जीवन पर आधारित था।

**विख्यातविजयम्** लखनऊ परिसर की प्रस्तुति थी बंगप्रदेश के नाट्यकार की यह कृति एक स्थानीय नरपति के कथानक पर आधारित थी। लखनऊ परिसर ने इसकी प्रस्तुति में यद्यपि प्रभूत परिश्रम किया था तथापि उन्होंने अपनी समधिक शक्ति का उपयोग 'प्रस्त' (Divies of Drama) पर किया। रंगमञ्च पर हाथी, घोड़े, हिरन, बैलगाड़ी आदि प्रासंगिक वस्तुओं की प्रतीकात्मक प्रस्तुति **प्रस्त** कही जाती है। सिनेमातंत्र ने तो प्रस्त को वास्तविकता में बदल दिया है क्योंकि वहाँ सांप कपड़े से बना नकली सांप नहीं, प्रत्युत वास्तविक होता है। उस दृष्टि से संस्कृत रंगमञ्च अभी, पीछे ही है। दक्षिणभारत के कलाकार निस्सन्देह उत्तरभारतीयों से आगे हैं, जन्मजात कलाजीवी होने के कारण। परन्तु उत्तर भारत में उसके लिये बड़ा श्रम करना पड़ता है।

डॉ. श्रीधर भास्करवर्णेकर-प्रणीत **विवेकानन्दचरितम्** की प्रस्तुति मुम्बई परिसर ने की। इस प्रस्तुति में पात्रों का चयन (विवेकानन्द, विधवा स्त्री, वृद्धा आदि) अद्भुत था। नाट्यकथा चूँकि अत्यन्त गम्भीर एवं शान्त प्रकृति की थी, अतः नाटक की सारी सफलता वाचिक एवं आहार्य पर ही थी। उसका निर्वाह पात्रों ने पूरी योग्यता के साथ किया।




गुरुवायूर परिसर ने राम पाणिवाद द्वारा प्रणीत **सीताराघवम्** नाटक प्रस्तुत किया, जो कि चतुर्विध अभिनय की दृष्टि से उत्तम था। रामकथापरक नाटकों से (उद्वेग की सीमा तक) चिर-परिचित होने के कारण भी इस नाटक की इदम्प्रथमतया प्रस्तुति ने दर्शकों में दुर्वाह आकर्षण पैदा कर दिया। राम एवं सीता का अभिनय विशेष प्रभावी रहा।




मायूराजप्रणीत **उदात्तराघव** की प्रस्तुति हुई गरली स्थित वेदव्यास परिसर द्वारा। इस नाटक के दृश्यांकन अतिशय प्रभावी रहे, विशेषतः अरण्य के दृश्य। पात्रों का अभिनय यद्यपि मध्यमकोटिक रहा, तथापि राम का अभिनय विशेष कोटिक रहा।



कविकर्णपूर-प्रणीत **चैतन्यचन्द्रोदय** की प्रस्तुति जम्मू परिसर की थी। इस प्रस्तुति का कथानक ही, नृत्य-गीत एवं कीर्तन-प्रधान होने के कारण सहज आकर्षण का स्रोत था। जम्मू के छात्रों ने उस आकर्षण को साकार किया अपने तदनुरूप अभिनय से।




**लक्ष्मीमानवेदम्** एक ऐतिहासिक कृति है। इसकी प्रस्तुति देवप्रयाग के श्रीरघुनाथकीर्ति-परिसर ने की इस नाट्य में आद्यन्त समञ्जस वातावरण होने के कारण भावोद्रेक का कोई सहज अवसर ही नहीं था (जैसा कि रत्नावली में है ऐन्द्रजालिक के कारण या शाकुन्तल में धीवर-प्रसंग के कारण) तथापि अभिनय सराहनीय था।

पुरी-परिसर की प्रस्तुति थी-**बाणहरणम्** कि वैकुण्ठ बिहारी नन्द की रचना है। अभिनेताओं के उच्चारण तथा व्यक्तित्व (सभी पात्र प्रायः छोटे कद के तथा स्थूलप्राय) के कारण यह प्रस्तुति सामान्य रही, जो कि आहार्य ने प्रभूत आकर्षण पैदा किया। **कुलशेखर-प्रणीत सुभद्राधनञ्जयम्** की प्रस्तुति शृंगेरी ने की। यह प्रस्तुति प्रत्येक दृष्टि से उत्तमकोटिक रही।



एवं अगरतला (एकलव्य परिसर) केन्द्र ने **राघवाभ्युदय** का मञ्चन किया। जयपुर परिसर ने वत्सराज प्रणीत **किरातार्जुनीयव्यायोग** का मञ्चन किया। दोनों ही प्रस्तुतियाँ सन्तोषप्रद थीं।

समारोह की अन्तिम प्रस्तुति **प्रेमपीयूषम्** थी भोपालपरिसर की। पात्रों के विशिष्ट अभिनय के कारण कथानक की नव्यता थी।

❖❖❖

# राष्ट्रियसंस्कृतसंस्थानेन प्रस्तुतानां रूपकाणां सूची

**प्रथमः वसन्तोत्सवः ( 3-4 मार्च, 2004 ) स्थानम्- डॉ. अम्बेडकरप्रेक्षागृहम्, आन्ध्रभवनम्, नवदेहली।**

प्रस्तुतानि नाट्यानि : 1. भगवदज्जुकीयम्, गुरुवायूरपरिसरः, 2. सभिकद्यूतकरम्, भोपालपरिसरः, 3. जागरूको भव, लखनऊपरिसरः 4. कर्णभारम्, श्रीराजीवगान्धीपरिसरः, 5. संस्कृतोद्गारम्, रणवीरपरिसरः, 6. मुद्राराक्षसम्, गरलीपरिसरः, 7. अभिज्ञानशाकुन्तलम्, जयपुरपरिसरः, 8. मदनदहनम्, सदाशिवपरिसरः।

**द्वितीयः वसन्तोत्सवः ( 1-2 मार्च, 2005 ) स्थानम्- डॉ. कमानीप्रेक्षागृहम्, नवदेहली।**

प्रस्तुतानि नाट्यानि : 9. कर्णाश्वत्थामीयम्, जयपुरपरिसरः, 10. चारुदत्तम्, श्रीराजीवगान्धीपरिसरः, 11. चम्पकरामः, गुरुवायूरपरिसरः, 12. राष्ट्रं नः प्राणाः, रणवीरपरिसरः, 13. उरुभङ्गम्, गरलीपरिसरः, 14. दूतवाक्यम्, लखनऊपरिसरः, 15. यमराजकीयम्, के.जे. सोमैय्याविद्यापीठम्, 16. कृतककौमुदम्, भोपालपरिसरः।

**तृतीयः वसन्तोत्सवः ( 23-24 फरवरी, 2006 ) स्थानम्- डॉ. कमानीप्रेक्षागृहम्, नवदेहली।**

प्रस्तुतानि नाट्यानि : 17. अश्वत्थामा, मुख्यालयः, 18. नागानन्दम्, गुरुवायूरपरिसरः, 19. मध्यमव्यायोगः, लखनऊपरिसरः, 20. मत्तविलासप्रहसनम्, भोपालपरिसरः, 21. दूतघटोत्कचम्, गरलीपरिसरः, 22. अबलासामर्थ्यम्, गङ्गानाथझापरिसरः, 23. मृच्छकटिकम्, श्रीराजीवगान्धीपरिसरः, 24. स्नुषाविजयम्, जयपुरपरिसरः, 25. देहि पादपल्लवमुदारम्, सदाशिवपरिसरः, 26. भूकैलाशम्, के.जे. सोमैय्याविद्यापीठम्, 27. सुभद्राहरणम्, रणवीरपरिसरः।

**चतुर्थः वसन्तोत्सवः ( 20-22 फरवरी, 2007 ) स्थानम्- एल.टी.जी. प्रेक्षागृहम्, नवदेहली।**

प्रस्तुतानि नाट्यानि : 28. दुर्योधनम्, मुख्यालयः, 29. स्वप्नवासवदत्तम्, गुरुवायूरपरिसरः, 30. हास्यचूडामणिः, लखनऊपरिसरः, 31. प्रतिज्ञाश्वत्थामीयम्, भोपालपरिसरः, 32. राजवैभवम्, सदाशिवपरिसरः, 33. प्रसन्नराघवम्, श्रीराजीवगान्धीपरिसरः, 34. पञ्चरात्रम्, गरलीपरिसरः, 35. बालभारतम्, जयपुरपरिसरः, 36. चाणक्यविजयम्, रणवीरपरिसरः, 37. रघुदासस्य पत्रम्, गंगानाथझापरिसरः, 38. विक्रमोर्वशीयम्, के.जे. सोमैय्याविद्यापीठम्।

**पञ्चमः कौमुदीमहोत्सवः ( 28-30 नवम्बर, 2007 ) स्थानम्- एल.टी.जी. प्रेक्षागृहम्, नवदेहली।**

प्रस्तुतानि नाट्यानि : 39. कौरवौरवम्, मुख्यालयः, 40. अभिषेकनाटकम्, श्रीराजीवगान्धीपरिसरः, 41. मालविकाग्निमित्रम्, गुरुवायूरपरिसरः, 42. त्रिपुरदाहः, भोपालपरिसरः, 43. लटकमेलकम्, जयपुरपरिसरः, 44. भर्तृहरिनिर्वेदम्, सदाशिवपरिसरः, 45. चण्डकौशिकम्, लखनऊपरिसरः, 46. कर्पूरमञ्जरी, गरलीपरिसरः, 47. धूर्तसमागमः, गङ्गानाथझापरिसरः, 48. अविमारकम्, रणवीरपरिसरः, 49. मदनकेतुचरितम्, के.जे. सोमैया-विद्यापीठम्, 50. यक्षगानम्-सुधन्वमोक्षः, श्रीराजीवगान्धीपरिसरः।

**षष्ठः कौमुदीमहोत्सवः ( 24-26 नवम्बर, 2008 ) स्थानम्- एल.टी.जी. प्रेक्षागृहम्, नवदेहली।**

प्रस्तुतानि नाट्यानि : 51. यक्षगानम्, मुख्यालयः, 52. पञ्चकल्याणी, गुरुवायूरपरिसरः, 53. आश्चर्य-चूडामणिः, श्रीराजीवगान्धीपरिसरः, 54. सीताच्छायम्, भोपालपरिसरः, 55. सावित्रीचरितम्, रणवीरपरिसरः, 56. प्रतिज्ञायौगन्धरायणम्, जयपुरपरिसरः, 57. रत्नावली, गरलीपरिसरः, 58. गौरीदिगम्बरप्रहसनम्, गङ्गानाथझापरिसरः, 59. विवाहविडम्बनम्, लखनऊपरिसरः, 60. उत्तररामचरितम्, सदाशिवपरिसरः, 61. राष्ट्रं रक्षति रक्षितम्, के.जे.

सोमैयाविद्यापीठम्, 62. मालविकाग्निमित्रम्, कालिदास संस्कृत अकादमी, उज्जैन (आमन्त्रितप्रस्तुतिः), 63. भगवदज्जुकीयम्, नीपारङ्गमण्डली, लखनऊ (आमन्त्रितप्रस्तुतिः)।

**सप्तमः कौमुदीमहोत्सवः ( 10-12 नवम्बर, 2009 ) स्थानम्- प्यारेलालप्रेक्षागृहम्, नवदेहली।**

प्रस्तुतानि नाट्यानि : 64. रासलीला, श्रीराधामाधवसंस्कृतमहाविद्यालयः, मणिपुरम् (आमन्त्रितप्रस्तुतिः), 65. अभिज्ञानशाकुन्तलम् (प्रथमाङ्कः), भोपालपरिसरः 66. प्रतिमानाटकम्, सदाशिवपरिसरः, 67. अभिज्ञानशाकुन्तलम् (द्वितीयाङ्कः), रणवीरपरिसरः, 68. अभिज्ञानशाकुन्तलम् (तृतीयाङ्कः), गरलीपरिसरः, 69. अभिज्ञानशाकुन्तलम् (चतुर्थाङ्कः), श्रीराजीवगान्धीपरिसरः, 70. इन्द्रजालम्, गङ्गानाथझापरिसरः, 71. विक्रमोर्वशीयम्, नाट्यपरिषद्, सागरम् (आमन्त्रितप्रस्तुतिः), 72. अभिज्ञानशाकुन्तलम् (पञ्चमाङ्कः), लखनऊपरिसरः, 73. अभिज्ञानशाकुन्तलम् (षष्ठाङ्कः), गुरुवायूरपरिसरः, 74. अभिज्ञानशाकुन्तलम् (सप्तमाङ्कः), जयपुरपरिसरः, 75. कुन्दमाला, कमलवशिष्ठस्य आमन्त्रिता प्रस्तुतिः।

**अष्टमः कौमुदीमहोत्सवः ( 25-27 अक्टूबर, 2010 ) स्थानम्- एल.टी.जी. प्रेक्षागृहम्, नवदेहली।**

प्रस्तुतानि नाट्यानि : 76. कर्णभारम्, गुरुवायूरपरिसरः, 77. मध्यमव्यायोगः, जयपुरपरिसरः 78. पञ्चरात्रम्, के.जे. सोमैय्याविद्यापीठम्, 79. प्रतिज्ञायौगन्धरायणम्, भोपालपरिसरः, 80. दूतवाक्यम्, गङ्गानाथझापरिसरः, 81. दरिद्रचारुदत्तम्, गरलीपरिसरः, 82. स्वप्नवासवदत्तम्, श्रीराजीवगान्धीपरिसरः, 83. बालचरितम्, श्रीसदाशिवपरिसरः, 84. अविमारकम्, लखनऊपरिसरः, 85. प्रतिमानाटकम्, श्रीरणवीरपरिसरः।

**नवमः कौमुदीमहोत्सवः ( 30 जनवरी, 2012 तः 01 फरवरी, 2012 ) स्थानम्- एल.टी.जी. प्रेक्षागृहम्, नवदेहली।**

प्रस्तुतानि नाट्यानि : 86. उत्तररामचरितम्, श्रीसदाशिवपरिसरः, 87. प्रशान्तराघवम्, गङ्गानाथझापरिसरः, 88. कुन्दमाला, जयपुरपरिसरः, 89. प्रसन्नराघवम्, भोपालपरिसरः, 90. बालरामायणम्, श्रीरणवीरपरिसरः, 91. अभिषेकनाटकम्, के.जे. सोमैय्याविद्यापीठम्, 92. सीताराघवम्, श्रीराजीवगान्धीपरिसरः, 93. प्रतिमानाटकम्, श्रीवेदव्यासपरिसरः, 94. महावीरचरितम्, लखनऊपरिसरः, 95. आश्चर्यचूडामणिः, गुरुवायूरपरिसरः।

**दशमः नाट्यमहोत्सवः ( 05-07 फरवरी, 2013 ) स्थानम्- एल.टी.जी. प्रेक्षागृहम्, नवदेहली।**

प्रस्तुतानि नाट्यानि : 96. मुद्रितकुमुदचन्द्रम्, गङ्गानाथझापरिसरः, 97. मल्लिकामकरन्दम्, श्रीसदाशिवपरिसरः, 98. मृच्छकटिकम् (1-2 अङ्कौ), श्रीराजीवगान्धीपरिसरः, 99. मृच्छकटिकम् (3-5 अङ्काः), गुरुवायूरपरिसरः, 100. मृच्छकटिकम् (6-7 अङ्कौ), श्रीवेदव्यासपरिसरः, 101. मृच्छकटिकम् (8 अङ्कः), श्रीरणवीरपरिसरः, 102. मृच्छकटिकम् (9-10 अङ्कौ), लखनऊपरिसरः, 103. मालतीमाधवम्, जयपुरपरिसरः, 104. कौमुदीमित्रानन्दप्रकरणम्, के.जे. सोमैयाविद्यापीठम्, 105. प्रबुद्धरौहिणेयम्, भोपालपरिसरः।

**एकादशः नाट्यमहोत्सवः ( 01-03 फरवरी, 2014 ) स्थानम्- हिन्दूमहाविद्यालयप्रेक्षागृहम्, नवदेहली।**

प्रस्तुतानि नाट्यानि : 106. प्रमद्वरा, गङ्गानाथझापरिसरः, 107. चन्द्रकला, श्रीसदाशिवपरिसरः, 108. वृषभानुजा, भोपालपरिसरः, 109. मृगाङ्कलेखा, के.जे. सोमैयाविद्यापीठम्, 110. मणिमञ्जरी, श्रीरणवीरपरिसरः, 111. विद्योत्तमा, श्रीवेदव्यासपरिसरः, 112. अनारकली, एकलव्यपरिसरः, 113. कर्पूरमञ्जरी, श्रीराजीवगान्धीपरिसरः, 114. प्रियदर्शिका, लखनऊपरिसरः, 115. रत्नावली, जयपुरपरिसरः, 116. शृङ्गारमञ्जरी, गुरुवायूरपरिसरः।

**द्वादशः नाट्यमहोत्सवः ( 04-06 फरवरी, 2015 ) स्थानम्- शङ्करहॉलकन्सर्टप्रेक्षागृहम्, दिल्लीविश्वविद्यालयः, नवदेहली।**

प्रस्तुतानि नाट्यानि : 117. मुद्राराक्षसम् (1-3 अङ्काः), गङ्गानाथझापरिसरः, 118. मुद्राराक्षसम् (4-7 अङ्काः), गुरुवायूरपरिसरः, 119. बालभारतम्, श्रीराजीवगान्धीपरिसरः, 120. मालतीमाधवम् (1-3 अङ्काः), लखनऊपरिसरः, 121. मालतीमाधवम् (4-7 अङ्काः), भोपालपरिसरः, 122. मालतीमाधवम् (8-10 अङ्काः), के. जे. सोमैया विद्यापीठम्, 123. बालरामायणम् (1-3 अङ्काः), श्रीवेदव्यासपरिसरः, 124. बालरामायणम् (4-7 अङ्काः), श्रीरणवीरपरिसरः, 125. बालरामायणम् (8-10 अङ्काः), जयपुरपरिसरः, 126. महावीरचरितम् (1-4 अङ्काः), श्रीसदाशिवपरिसरः, 127. महावीरचरितम् (5-7 अङ्काः), एकलव्यपरिसरः।

**त्रयोदशः नाट्यमहोत्सवः ( 24-26 फरवरी, 2016 ) स्थानम्- डॉ. सर्वेपल्ली- राधाकृष्णन्प्रेक्षागृहम्, केन्द्रीयविद्यालयः ( 03 ), दिल्लीकेंट, नवदेहली।**

प्रस्तुतानि नाट्यानि : 128. लटकमेलकम्, श्रीरणवीरपरिसरः, 129. वञ्चकपञ्चकम्, एकलव्यपरिसरः, 130. कुहनाभैक्षवम्, श्रीवेदव्यासपरिसरः, 131. मृदङ्गदासप्रहसनम्, श्रीगङ्गानाथझापरिसरः, 132. स्नुषाविजयम्, लखनऊपरिसरः, 133. हास्यार्णवप्रहसनम्, श्रीसदाशिवपरिसरः, 134. पलाण्डुमण्डनम्, जयपुरपरिसरः, 135. मत्तविलासः, गुरुवायूरपरिसरः, 136. विवाहविडम्बनम्, के.जे. सोमैया विद्यापीठम्, 137. हास्यचूडामणिः, भोपालपरिसरः, 138. भगवदज्जुकीयम्, श्रीराजीवगान्धीपरिसरः।

**चतुर्दशः नाट्यमहोत्सवः ( 27 फरवरी तः 1 मार्च, 2017 ) स्थानम्- डॉ. सर्वेपल्ली- राधाकृष्णन्प्रेक्षागृहम्, केन्द्रीयविद्यालयः ( 03 ), दिल्लीकेंट, नवदेहली।**

प्रस्तुतानि नाट्यानि : 139. छत्रपतिसाम्राज्यम् (1-5 अङ्काः), वेदव्यासपरिसरः, 140. छत्रपतिसाम्राज्यम् (6-10 अङ्काः), श्रीरणवीरपरिसरः, 141. पण्डितराजीयम्, श्रीराजीवगान्धीपरिसरः, 142. अङ्गुष्ठदानम्, एकलव्यपरिसरः, 143. लीलाभोजराजम्, गङ्गानाथझापरिसरः, 144. दाम्पत्यकलहम्, श्रीरघुनाथकीर्तिपरिसरः, 145. रक्षाबन्धनम्, श्रीसदाशिवपरिसरः, 146. मदनमोहनमालवीयकीर्तिमञ्जरीनाटकम्, लखनऊपरिसरः, 147. संयोगितास्वयंवरम्, गुरुवायूरपरिसरः, 148. प्रतापविजयम्, जयपुरपरिसरः, 149. स्नेहसौवीरम्, के.जे. सोमैयासंस्कृतविद्यापीठम्, 150. तण्डुलप्रस्थीयम्, भोपालपरिसरः।

**पञ्चदशः नाट्यमहोत्सवः ( 22 नवम्बर तः 24 नवम्बरः, 2017 ) स्थानम्- राष्ट्रियसंस्कृतसंस्थानम्, एकलव्यपरिसरः, अगरतला।**

प्रस्तुतानि नाट्यानि : 151. विख्यातविजयम्, लखनऊपरिसरः, 152. विवेकानन्दविजयम्, क.जे. सोमैयासंस्कृतविद्यापीठम्, 153. सीताराघवम्, गुरुवायूरपरिसरः, 154. उदात्तराघवम्, वेदव्यासपरिसरः, 155. चैतन्यचन्द्रोदयम्, श्रीरणवीरपरिसरः, 156. लक्ष्मीमानवेदम्, श्रीरघुनाथकीर्तिपरिसरः, 157. बाणहरणम्, श्रीसदाशिवपरिसरः, 158. सुभद्राधनञ्जयम्, श्रीराजीवगान्धीपरिसरः, 159. राघवाभ्युदयम्, एकलव्यपरिसरः, 160. किरातार्जुनीयव्यायोगः, जयपुरपरिसरः, 161. प्रेमपीयूषम्, भोपालपरिसरः।

❖❖❖

# पञ्चदशनाट्यमहोत्सवस्य कानिचन चित्राणि






























# राष्ट्रिय-संस्कृत-संस्थानम्

(मानव संसाधन विकास मन्त्रालय, भारत सरकार के तत्त्वावधान में संस्थापित मानित विश्वविद्यालय)
राष्ट्रिय-मूल्यांकन-प्रत्यायन-परिषद् द्वारा 'ए' श्रेणी में प्रत्यायित
56-57, इन्स्टीट्यूशनल एरिया, जनकपुरी, नवदेहली-110058
दूरभाष : 011-28524993, 28521994, 28520977
email : rsks@nda.vsnl.net.in   website : www.sanskrit.nic.in